# MT EDUCARE LTD.

CBSE - X

**QUEST- I (Semi Prelim - I)**
**2017 - 18**

**PORTION : Ch. 1-5, सन्धि, प्रत्यय, अव्यय, संख्या**

**Roll No.** | | | | | | | |

**Code No. 52/1**

**Series LRH/1**

| | | | |
|---|---|---|---|
| • खण्डः क<br>Section A | : | अपठितांश-अवबोधनम् / अपठित-अवबोधन<br>Unseen Reading Comprehension | 10 अङ्काः |
| • खण्डः ख<br>Section B | : | रचनात्मककार्यम् / रचनात्मक-कार्य<br>Writing Skills | 15 अङ्काः |
| • खण्डः ग<br>Section C | : | अनुप्रयुक्तव्याकरणम् / अनुप्रयुक्त व्याकरण<br>Applied Grammar | 25 अङ्काः |
| • खण्डः घ<br>Section D | : | पठित-अवबोधनम् / पठित-अवबोधन<br>Reading Comprehension | 30 अङ्काः |

***Time allowed*** **:** 3 hours ***Maximum Marks*** **:** 80

## COMMUNICATIVE SANSKRIT

**General Instructions :**

(i) The question paper has four sections.

(ii) The answers have to be written in a separate answer-sheet.

(iii) The answers to each section must be written in a serial at one place.

(iv) Don't write answers in the question paper.

(v) Write the question number according to the question paper.

(vi) Answer all the questions in **Sanskrit**.

## खण्डः 'क'
## (SECTION A)
## अपठित अवबोधनम् (Unseen Reading Comprehension)

**Q.1. अधोलिखितम् अनुच्छेदं पठित्वा प्रश्नानाम् उत्तराणि लिखत ।**

एषा घटना आङ्ग्लीयानां शासनकालस्य अस्ति । भारतीयान् जनान् सभ्यान् कर्तुम् आङ्ग्लीयभाषायाः संस्कृतेः च शिक्षा आरब्धा असीत् । तस्मिन्नेव काले एकः आङ्ग्लीयः न्यायाधीशः संस्कृतं पठतः पण्डितान् अपृच्छत् - 'यूयं किं पठथ ?' इति । तैः उक्तम् - संस्कृतम् इति । सः अवदत्-अहमपि इमां भाषां पठितुम् इच्छामि । न्यायाधीशः पण्डितेभ्यः संस्कृतं पठितुम् आरभत । किंचित्कालानन्तरम् आश्चर्यचकितः न्यायाधीशः पण्डितान् अवदत् - 'एषा भाषा भारतस्य भाषा कथं भवितुं शक्नोति ? एषा तु ग्रीकलैटिन भाषयोः मिश्रणं कृत्वा भवद्भिः कापि भाषा निर्मिता ।' परन्तु यदा सः संस्कृतस्य अपारसाहित्यम् अपश्यत् तदा विश्वस्तः जातः यत् अखिलविश्वस्य मूलज्ञानं तु भारतवर्षस्य संस्कृत-ग्रन्थेषु वर्तते । ततः प्रभृतिः संस्कृतग्रन्थानाम् अध्ययनस्य कार्ये विश्वस्य विद्वांसः निरताः अभवन् । संस्कृतेन भारतवर्षस्य श्रेष्ठत्वं सम्पूर्णे विश्वे प्रतिष्ठापितम् ।

**I] एकपदेन उत्तरत ।** **[2]**

(i) एषा घटना केषां शासनकालस्य अस्ति ?

(ii) भारतीयान् जनान् कीदृशान् कर्तुम् आङ्ग्लीयभाषायाः शिक्षा आरब्धा ?

**II] पूर्णवाक्येन उत्तरत ।** **[4]**

(i) आश्चर्यचकितः न्यायाधीशः पण्डितान् किम् अवदत् ?

(ii) न्यायाधीशः कदा विश्वस्तः जातः ?

**III] प्रदत्तविकल्पेभ्यः उचितम् उत्तरं निर्देशानुसारं चित्वा लिखत ।** **[4]**

(i) 'विद्वांसः' इति पदस्य किं विशेषणपदं अस्ति ?
(अ) विश्वस्य (ब) पण्डितान् (क) निरताः (ड) भारतवर्षम्

(ii) 'अखिले' इति पदस्य किं पर्यायपदं गद्यांशे प्रयुक्तम् ?
(अ) संस्कृते (ब) विश्वे (क) पण्डितेभ्यः (ड) सम्पूर्णे

(iii) गद्यांशे 'सः' इति पदं कस्मै प्रयुक्तम् ?
(अ) पण्डितेभ्यः (ब) विद्वद्भ्यः (क) न्यायाधीशाय (ड) संस्कृतग्रन्थाय

(iv) 'अपृच्छत्' इति क्रियापदस्य किं कर्तृपदम् ?
(अ) न्यायाधीशः (ब) संस्कृतम् (क) पण्डितः (ड) विद्वांसः

## खण्डः 'ख'
## (SECTION B)
## रचनात्मकं कार्यम् (Writing Skill)

**Q.2. भवान् नीरजः । भवतः ग्रामे स्वास्थकेन्द्रस्योद्घाटनं भवति । भवतः मनसः आह्लादस्य वर्णनं कुर्वत् भवान् मित्रं सुनन्दं प्रति पत्रं लिखति । तस्मिन् पत्रे मञ्जूषायाः रिक्तस्थानानि पूरयन् पत्रं पूर्णं कृत्वा पुनः लिखतु । [5]**

गुरुग्रामः
पाटलिपुत्रम् ।
दिनाङ्कः - १३/०७/२०१६

(i) प्रियमित्र i) ......

सस्नेहं ii) ......

भवतः पत्रं प्राप्तम् । समाचाराः अवगताः । हर्षस्य विषयोऽयं यद् अस्माकं iii) ...... मण्डलाधिकारिभिः स्वास्थ्यकेन्द्रस्योद्घाटनं iv) ...... तारिकायां भविष्यति । सर्वे v) ...... समाचारम् एतं ज्ञात्वा vi) ...... सञ्जाताः । अनेन स्वास्थ्यकेन्द्रेण vii) ...... रोगाणाम् उपचारो ग्रामे एव भविष्यति । ग्रामिणाः अधुना उपनगरं viii) ...... न गमिष्यन्ति । एतेन न केवलं ग्रामिणानां धनस्य ix) ...... न भविष्यति परं तेषां समयस्य, नाशोऽपि न भविष्यति । क्षणेन रोगेषु नष्टेषु ग्रामे x) ...... सुखदं भविष्यति ।

भावं जनानां द्रष्टुं भवान् अवश्यं मम ग्रामम् आगच्छतु मातृचरणयोः प्रणामाः, स्निग्धायै च शुभाशिषः ।

भवतां सुहृत्
नीरजः ।

**मञ्जूषा** : (i) चिकित्सायै, ii) सुनन्द !, iii) पञ्चविंशत्याम्, iv) प्रसन्नाः, v) ग्रामिणाः, vi) नमः, vii) ग्रामे, viii) आर्तवानाम्, ix) वातावरणं, x) अपव्ययो ।)

**Q.3. अधः प्रदत्तं चित्रं दृष्ट्वा मञ्जूषायां प्रदत्तशब्दानां सहायतया पञ्च वाक्यानि संस्कृतेन लिखत । [10]**



**मञ्जूषा** : (गृञ्जनम्, वृन्ताकम्, करण्डम्, जनाः, विक्रेतारः, क्रीणान्ति, क्रेतारः मूल्यं पृच्छन्ति, कारवेल्लम्, शाक-आपणस्य दृश्यम् ।)

## खण्डः 'ग'
## (SECTION C)
## अनुप्रयुक्त व्याकरणम्
## (Applied Grammar)

**Q.4. अधोलिखितवाक्येषु स्थूलाक्षरपदानां समुचितं सन्धिं विच्छेदं वा कुरुत । [4]**

(i) वेदानां **सामवेदोऽस्मि** ।

(ii) नृपः **रिपुञ्जयति** ।

(iii) '**यथोचितं** क्रियताम्' इति राजादेशं श्रुत्वा सर्वे कपयः अचिन्तयन् ।

(iv) शुश्रूषा श्रवणं **चैव** ग्रहणं धारणं तथा ।

**Q.5. अधोलिखितवाक्येषु स्थूलाक्षरपदानां समासं विग्रहं वा प्रदत्तविकल्पेभ्यः चित्वा लिखत । [4]**

(i) **वृक्षमूले** उपविश्य सः अवदत् ।

(अ) वृक्ष मूले । (ब) वृक्षस्य मूले ।

(क) वृक्षं मूले (ड) वृक्षः मूले ।

(ii) किं हेयम् ? **अकार्यम्** ।

(अ) अ कार्यम् । (ब) न कार्य ।

(क) न कार्यम् । (ड) न अकार्यम् ।

(iii) अहं पठनाय **विद्यालयं** गच्छामि ।

(अ) विद्या आलयम् । (ब) विद्याम् आलयम् ।

(क) विद्या आलय । (ड) विद्यायै आलयम् ।

(iv) ध्वजे **कषायवर्णः** उत्तमाङ्गे तिष्ठति ।

(अ) कषाय वर्णः । (ब) कषायः वर्णः ।

(क) कषायाः वर्णाः । (ड) कषायौ वर्णौ ।

**Q.6. अधोलिखितवाक्येषु स्थूलाक्षरपदानां प्रकृति-प्रत्ययौ संयोज्य विभज्य वा समुचितम् उत्तरं लिखत । [4]**

(i) पुस्तकानि पुस्तकालये एव **(स्था + तव्यत्)** ।

(अ) स्थापयितव्यम् (ब) स्थातव्यम्

(क) स्थापयिततव्यानि (ड) स्थातव्यत्

(ii) कृषकैः क्षेत्रेषु पादपाः **(रोप् + अनीयर्)** ।

(अ) रोपनीयाः (ब) रोपनीय

(क) रोपणीयाः (ड) रोपनीयम्

(iii) **(शक्ति + मतुप्)** जनाः एव दुर्बलान् रक्षन्ति ।

(अ) शक्तिमत् (ब) शक्तिमन्तः
(क) शक्तिमानः (ड) शक्तिमाना

(iv) वृक्षारोपणम् अस्माकं **(नीति + ठक्)** कर्तव्यं विद्यते ।

(अ) नैतिकः (ब) नीतिक
(क) नेतिकम् (ड) नैतिकम्

**Q.7. अधोलिखितवाक्येषु मञ्जूषायाः उचितम् अव्ययपदं चित्वा रिक्तस्थानानि पूरयत । [4]**

(i) ............ अस्माकं विद्यालये एका गोष्ठी अभवत् ।
(ii) ............ महानगरेषु वर्धमानं प्रदूषणं प्रति चर्चा कृता ।
(iii) गोष्ठ्यां वक्तॄणां ............ विचाराणां सारः आसीत् ।
(iv) गृहात् ............ अवकरः न क्षेपणीयः ।

**मञ्जूषा :** (तत्र, बहिः, ह्यः, परस्परम्)

**Q.8. अधोलिखिते संवादे वाच्यानुसारं रिक्तस्थानपूर्तिं कुरुत । [3]**

राकेशः - प्रातःकाले ............ किं करोति ?
राजेशः - मया ............ स्मर्यते ।
राकेशः - किं भवान् प्रातः भ्रमणाय न गच्छति ?
राजेशः - अहम् अस्वस्थः, अतः न ।
राकेशः - किं भवान् नित्यं व्यायामम् अपि करोति ?
राजेशः - आम् ! मया नित्यं व्यायामः ............ ।

**मञ्जूषा :** (पाठः, भवान्, क्रियते)

**Q.9. अधोलिखितेषु वाक्येषु अङ्कानां स्थाने संस्कृतपदानि लिखत । [2]**
**कमलिनी एकस्मिन् विद्यालये अध्यापिका अस्ति ।**

(i) सा प्रातः ६.१५ वादने उत्थाय उपवनं भ्रमणाय गच्छति ।
(ii) तत्पश्चात् सा ७.४५ वादने पाठयितुं विद्यालयं गच्छति ।

**Q.10. अधोलिखितवाक्येषु स्थूलाक्षरपदम् अशुद्धम् अस्ति । अशुद्धपदं संशोध्य लिखत । [4]**

(i) आवां विद्यालये **गच्छामः** ।
(ii) **सः** अध्ययने संलग्ना अस्ति ।
(iii) श्वः रामः विद्यालयं **गच्छति** ।
(iv) त्वं **सर्वे** पुस्तकानि आदाय आगच्छ ।

## खण्डः 'घ'

## (SECTION D)

## पठित-अवबोधनम् (अपठित-अवबोधन)

## (Reading Comprehension)

**Q.11. अधोलिखितं गद्यांशं, पद्यांशं, नाट्यांशं च पठित्वा प्रदत्तप्रश्नानाम् उत्तराणि संस्कृतेन लिखत ।**

अ) **गद्यांशः ।**

अथ एकदा भगवान् बोधिसत्त्वः बहुजन्मार्जितपुण्यफलैः शिवीनां राजा बभूव । स बाल्यात् एव वृद्धोपसेवी, विनयशीलः शास्त्रपारङ्गतः च आसीत् । जनकल्याणकर्मसु रतः असौ पुत्रवत् प्रजाः पालयति स्म । कारुण्य - औदार्यादिसद्गुणोपेतः स नगरस्य समन्ततः धन-धान्यसमृद्धाः दानशालाः अकारयत् । तत्र अर्थिनां समूहः अन्न-पान-वसन-रजत-सुवर्णादिकानि अभीष्टानि वस्तूनि प्राप्य सन्तुष्टः अभवत् । राज्ञः दानशीलताम् आकर्ण्य देशान्तरेभ्योऽपि जनाः तं देशम् आयान्ति स्म ।

**I] एकपदेन उत्तरत ।** **[2]**

(i) बोधिसत्त्वः कस्मात् एव शास्त्रपारङ्गतः आसीत् ?

(ii) कस्य दानशीलतां श्रुत्वा जनाः देशम् आयान्ति स्म ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

कानि वस्तूनि प्राप्य जनाः सन्तुष्टः अभवत् ?

**III] निर्देशानुसारम् उत्तरत ।** **[2]**

(i) विशेषणं चिनुत - दानशालाः -

(अ) समन्ततः (ब) विनयशीलः

(क) बहवः (ब) धान्यसमृद्धाः

(ii) 'अभवत्' इत्यर्थे किं पदम् अत्र प्रयुक्तम् ?

(अ) रतः । (ब) प्रजाः । (क) बभूव । (ड) पालयति ।

आ) **पद्यांशः ।**

किं जीवितम् ? अनवद्यम्, किं जाड्यम् ? पाठतोऽप्यनभ्यासः ।
को जागर्ति ? विवेकी,का निद्रा ? मूढता जन्तोः ।।

**I] एकपदेन उत्तरत ।** **[2]**

(i) कः जागर्ति ?

(ii) का निद्रा ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

(i) 'जाड्य' इत्यस्य व्याख्या का ?

(ii) जीवनं कथं भवेत् ?

**III] निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत ।** **[2]**

(i) निद्राति इति पदस्य कृते किं विलोमपदं प्रयुक्तम् ?

(अ) अनभ्यासः (ब) जागर्ति

(क) विवेकी (ड) मूढता

(ii) 'न निन्दनीयः' इत्यर्थे कः शब्दः श्लोके प्रयुक्तः ?

(अ) अनभ्यासः । (ब) निद्रा ।

(क) जाड्यम् । (ड) अनवद्यम् ।

**इ) नाट्यांशः ।**

**वानरयूथपः** : सूपकाराणां मेषेण सह एषः दैनन्दिनः कलहः नूनम् अस्माकं विनाशकारणं भविष्यति । तदेतद् कदा ?

**कपयः** : (प्रहस्य) भो ! किमिदम् उच्यते ? न वयं स्वर्गसमानोपभोगान् विहाय अटव्यां क्षार-तिक्त-कषाय-कटु-रूक्षफलानि भक्षयिष्यामः ।

**वानरयूथपः** : (सगद्गदम्) रसनास्वादलुब्धाः यूयम् अस्य सुखस्य कुपरिणामं न जानीथ । अहं तु वनं गच्छामि ।

**I] एकपदेन उत्तरत ।** **[2]**

(i) केन सह कलहः विनाशकारणं भविष्यति ?

(ii) वानरयूथपतिः स्वर्गसमानं किं त्यक्तुम् अकथयत् ?

**II] पूर्णवाक्येन उत्तरत ।** **[2]**

वानरयूथपतिः सगद्गदम् किम् उक्तवान् ?

**III] निर्देशानुसारं शुद्धम् उत्तरं प्रदत्तविकल्पेभ्यः चित्वा लिखत ।** **[2]**

(i) अस्मिन् नाट्यांशे 'मर्कटः' इति शब्दस्य कृते पर्यायपदं किम् अस्ति ?

(अ) विहाय (ब) मेषः (क) सूपः (ड) कपिः

(ii) अस्मिन् नाट्यांशे 'जानीथ' इति क्रियापदस्य कृते कर्तृपदं किम् अस्ति ?

(अ) अहम् (ब) यूयम् (क) सः (ड) वानरयूथपः

**Q.12. वाक्येषु रेखाङ्कितपदानां स्थाने उचितं प्रश्नवाचकपदं प्रयुज्य प्रश्ननिर्माणं कुरुत ।** **[4]**

(i) **विषयाणाम्** उपभोगेन तेषु आसक्तिः जायते ।

(ii) आदौ **इन्द्रियाणि** नियम्य कामः वशे करणीयः ।

(iii) **अभीष्टं वस्तुजातं** प्राप्य याचकाः तुष्टाः आसन् ।

(iv) राजा **याचकेभ्यः** दानं ददाति स्म ।

**Q.13. निम्नलिखितश्लोकस्य अन्वये रिक्तस्थानानि पूरयित्वा पुनः लिखत ।** **[4]**

न तथा शीतलसलिलं न चन्दनरसो न शीतला छाया ।
प्रह्लादयति च पुरुषं, यथा मधुरमाभाषिणि वाणी ।।

**अन्वय** : न शीतलसलिलं न ........ न शीतला ........ पुरुषं ........ प्रह्लादयति यथा ........ वाणी ।

**मञ्जूषा** : (मधुरभाषिणी, चन्दनरसः, तथा, छाया)

**Q.14. वाक्येषु स्थूलाक्षरपदानां स्थाने विकल्पेभ्यः उचितं पदं चिनुत ।** **[4]**

(i) अयं कोशः कोऽपि अपूर्वः **विद्यते** ।
(अ) अस्ति (ब) सन्ति
(क) करोति (ड) भाति

(ii) अहर्निशं **महानसं** प्रविश्य यत् पश्यति तद् भक्षयति ।
(अ) मानसरोवरम् (ब) पाकशालाम्
(क) महाभोजनम् (ड) मानसम्

(iii) यत् वस्तु उचितकाले दीयते तत् एव **अनर्घं** वर्तते ।
(अ) अद्भुतम् (ब) अपूर्णम्
(क) बहुमूल्यम् (ड) साधारणम्

(iv) किं विषम् ? **अवधीरणा** ।
(अ) आज्ञाः पालनम् (ब) सम्यक् धारणम्
(क) तिरस्कारः (ड) अवधारणा

*All the Best* 👍